# तृतीयाध्यायस्य चतुर्थः पादः

## धातुसम्बन्धे प्रत्ययाः । (१/२८२४)

धात्वर्थे धातुशब्दः[1] । धात्वर्थानां सम्बन्धो धातुसम्बन्धः [2]विशेषणविशेष्यभावः । तस्मिन् सति अयथाकालोक्ता अपि प्रत्ययाः साधवो भवन्ति । अग्निष्टोमयाज्यस्य पुत्रो जनिता । कृतः कटः श्वो भविता । भावि कृत्यमासीत् । अग्निष्टोमयाजी इति भूतकालः, जनिता इति [3]भविष्यत्कालः । तत्र [4]भूतः कालः भविष्यत्कालेन अभिसम्बध्यमानः साधुर्भवति । विशेषणं [5]गुणत्वाद् विशेष्यकालमनुरुध्यते, तेन विपर्ययो न भवति ।

प्रत्ययाधिकारे पुनः प्रत्ययग्रहणम् अधात्वधिकारविहिता अपि प्रत्ययाः तद्धिता धातुसम्बन्धे सति कालभेदे साधवो यथा स्युः इति । गोमानासीत् । गोमान् भविता । [6]गावो विद्यन्ते[7]ऽस्य इति वर्तमानविहितो मतुप्, आसीत् भविता इति सम्बन्धादतीते भविष्यति च साधुर्भवति ॥

## क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः । (२/२८२५)

धातुसम्बधे इति वर्तते । पौनःपुन्यं भृशार्थो वा क्रियासमभिहारः । प्रकृत्यर्थविशेषणं [8]चैतत् । समभिहारविशिष्टक्रियावचनाद् धातोः लोट् प्रत्ययो भवति सर्वेषु कालेषु । सर्वलकाराणामपवादः । तस्य [9]च लोटो हि स्व इत्येतावादेशौ भवतः । तध्वंभाविनस्तु वा भवतः । योगविभागो[10]ऽत्र कर्तव्यः । क्रियासमभिहारे लोड् भवति, ततो लोटो हिस्वौ । लोट् इत्येव, लोड्धर्माणौ हिस्वौ भवतः इत्यर्थः । तेन [11]आत्मनेपदपरस्मैपदत्वं भेदेनावतिष्ठते, तिङत्वं च द्वयोरपि भवति । लुनीहि लुनीहीत्येवायं लुनाति, इमौ लुनीतः, इमे लुनन्ति । लुनीहि लुनीहीत्येव त्वं लुनासि, युवां लुनीथः, यूयं लुनीथ । अथ वा, लुनीत लुनीतेत्येव यूयं लुनीथ । लुनीहि लुनीहीत्येवाहं लुनामि, आवां लुनीवः, वयं लुनीमः । भूते – लुनीहि लुनीहीत्येवायमलावीत्, [12]अलाविष्टाम्, [13]अलाविषुः । एवं मध्यमोत्तमयोरुदाहार्यम् । भविष्यति – लुनीहि लुनीहीत्येवायं लविष्यति, [14]लविष्यतः, [15]लविष्यन्ति । एवं मध्यमोत्तमयो[16]रुदाहार्यम् । अधीष्वाधीष्वेत्येवायमधीते, इमावधीयाते, इमेऽधीयते । अधीष्वाधीष्वेत्येव त्वमधीषे, युवामधीयाथे, यूयमधीध्वे । अथ वा, अधीध्वमधीध्वमित्येव यूयमधीध्वे । अधीष्वाधीष्वेत्येवाहमधीये, आवामधीवहे, [17]वयमधीमहे । एवं सर्वेष्वेव[18] लकारेषूदाहार्यम् । [19]क्रियासमभिहाराभिव्यक्तौ द्विर्वचनमयं लोडपेक्षते, क्रिया–समभिहारे द्वे भवतः इति । यङ्प्रत्ययः पुनरस्मिन्नेवा[20]र्थे विधीयमानः स्वयमेव शक्तत्वान्नापेक्षते द्विर्वचनम् ॥

---

1. वर्तते इत्यधिकम् अ. क. 2. विशेषणे विशेष्यभावः ब. 3. भविष्यकालः ब. 4. भूतकालः ह. ब. 5. कालेन अभिसम्बध्यते फ, विशेषणगुणत्वात् ग, विशेषणे गुणत्वात् ब. 6. गावो – भवति नास्ति ह. 7. यस्य ब. 8. तत् फ. 9. च नास्ति ब. 10. अत्र नास्ति फ, च इत्यधिकम् ब. 11. परस्मैपदात्मनेपदत्वं फ. 12. इमौ इत्यधिकम् फ. 13. इमे इत्यधिकम् फ. 14. इमौ इत्यधिकम् फ. 15. इमे इत्यधिकम् फ. 16. अपि इत्यधिकम् फ, उदाहार्यः ब. 17. वयं नास्ति फ. 18. एव नास्ति फ. 19. क्रियाभिव्यक्तौ फ. 20. अर्थे नास्ति फ.